# shrIhanumadaShTottarashatanAmastotram 6

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૬

## Document Information

Text title : Hanumat Ashtottarashatanama Stotram 6

File name : hanumadaShTottarashatanAmastotram6.itx

Category : hanumaana, aShTottarashatanAma, stotra

Location : doc_hanumaana

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, Mahesh M. Jani, PSA Easwaran

Description-comments : See corresponding nAmAvaliH

Source : ParAsharasamhita Hanumachcharitra Vol 2 pages 10-12

Latest update : July 8, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 24, 2024

*sanskritdocuments.org*

# શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમ્ ૬

॥ શ્રીગણેશાય નમઃ ॥

॥ શ્રીસીતારામચન્દ્રાભ્યાં નમઃ ॥

શ્રીપરાશર ઉવાચ -
શ‌ૃણુ મૈત્રેય! મન્ત્રજ્ઞ અષ્ટોત્તરશતસંજ્ઞિકઃ ।
નામ્નાં હનૂમતશ્ચૈવ સ્તોત્રાણાં શોકનાશનમ્ ॥

પૂર્વં શિવેન પાર્વત્યાઃ કથિતં પાપનાશનમ્ ।
ગોપ્યાદ્ગોપતરં ચૈવ સર્વેપ્સિતફલપ્રદમ્ ॥

વિનિયોગઃ -
ૐ અસ્ય શ્રીહનુમદષ્ટોત્તરશતનામસ્તોત્રમન્ત્રસ્ય સદાશિવ ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । શ્રીહનુમાન્ દેવતા । હ્રાં બીજમ્ ।
હ્રીં શક્તિઃ । હ્રૂં કીલકમ્ ।
શ્રીહનુમદ્દેવતા પ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
ધ્યાનમ્ -
ધ્યાયેદ્બાલદિવાકરદ્યુતિનિભં દેવારિદર્પાપહમ્
દેવેન્દ્રપ્રમુખૈઃ પ્રશસ્તયશસં દેદીપ્યમાનં ઋચા ।
સુગ્રીવાદિસમસ્તવાનરયુતં સુવ્યક્તતત્ત્વપ્રિયં
સંરક્તારુણલોચનં પવનજં પીતામ્બરાલઙ્કૃતમ્ ॥

॥ ઇતિ ધ્યાનમ્ ॥

ૐ હનુમાન્ સ્થિરકીર્તિશ્ચ તૃણીકૃતજગત્ત્રયઃ ।
સુરપૂજ્યસ્સુરશ્રેષ્ઠો સર્વાધીશસ્સુખપ્રદઃ ॥

જ્ઞાનપ્રદો જ્ઞાનગમ્યો વિજ્ઞાની વિશ્વવન્દિતઃ ।
વજ્રદેહો રુદ્રમૂર્તી દગ્ધલઙ્કા વરપ્રદઃ ॥

ઇન્દ્રજિદ્ભયકર્તા ચ રાવણસ્ય ભયઙ્કરઃ ।

કુમ્ભકર્ણસ્ય ભયદો રમાદાસઃ કપીશ્વરઃ ॥

લક્ષ્મણાનન્દકરો દેવઃ કપિસૈન્યસ્ય રક્ષકઃ ।
સુગ્રીવસચિવો મન્ત્રી પર્વતોત્પાટનો પ્રભુઃ ॥

આજન્મબ્રહ્મચારી ચ ગમ્ભીરધ્વનિભીતિદઃ ।
સર્વેશો જ્વરહારી ચ ગ્રહકૂટવિનાશકઃ ॥

ઢાકિનીધ્વંસકસ્સર્વભૂતપ્રેતવિદારણઃ ।
વિષહર્તા ચ વિભવો નિત્યસ્સર્વજગત્પ્રભુઃ ॥

ભગવાન્ કુણ્ડલી દણ્ડી  સ્વર્ણયજ્ઞોપવીતધૃત્  ।
અગ્નિગર્ભઃ સ્વર્ણકાન્તિઃ દ્વિભુજસ્તુ કૃતાઞ્જલિઃ ॥

બ્રહ્માસ્ત્રવારણશ્શાન્તો - બ્રહ્મણ્યો બ્રહ્મરૂપધૃત્ ।
શત્રુહન્તા કાર્યદક્ષો લલાટાક્ષોઽપરેશ્વરઃ ॥

લઙ્કોદ્દીપો મહાકાયઃ રણશૂરોઽમિતપ્રભઃ ।
વાયુવેગી મનોવેગી ગરુડસ્ય સમોજસે ॥

મહાત્મા વિષ્ણુભક્તશ્ચ ભક્તાભીષ્ટફલપ્રદઃ ।
સઞ્જીવિનીસમાહર્તા સચ્ચિદાનન્દવિગ્રહઃ ॥

ત્રિમૂર્તી પુણ્ડરીકાક્ષો વિશ્વજિદ્વિશ્વભાવનઃ ।
વિશ્વહર્તા વિશ્વકર્તા ભવદુઃખૈકભેષજઃ ॥

વહ્નિતેજો મહાશાન્તો ચન્દ્રસ્ય સદૃશો ભવઃ ।
સેતુકર્તા કાર્યદક્ષો ભક્તપોષણતત્પરઃ ॥

મહાયોગી મહાધૈર્યો  મહાબલપરાક્રમઃ ।
અક્ષહન્તા રાક્ષસઘ્નો ધૂમ્રાક્ષવધકૃન્મુને ॥

ગ્રસ્તસૂર્યો શાસ્ત્રવેત્તા વાયુપુત્રઃ પ્રતાપવાન્ ।
તપસ્વી ધર્મનિરતો કાલનેમિવધોદ્યમઃ ॥

છાયાહર્તા દિવ્યદેહો પાવનઃ પુણ્યકૃચ્છિવઃ  ।
લઙ્કાભયપ્રદો ધીરો મુક્તાહારવિભૂષિતઃ ॥

મુક્તિદો ભુક્તિદશ્ચૈવ  શક્તિદ શઙ્કરસ્તથા ।
હરિર્નિરઞ્જનો નિત્યો  સર્વપુણ્યફલપ્રદઃ ॥

ઇતીદં શ્રીહરેઃ પુણ્યનામાષ્ટોત્તરશતમ્ ।
પઠનાચ્છ્રવણાન્મર્ત્યઃ જીવન્મુક્તો ભવેદ્ધ્રુવમ્ ॥

॥ ઇતિ શ્રીપરાશરસંહિતાયાન્તર્ગતે શ્રીપરાશરમૈત્રેયસંવાદે
હનુમદષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, Mahesh M. Jani, Psa Easwaran

---

*shrIhanumadaShTottarashatanAmastotram 6*
pdf was typeset on August 24, 2024

Please send corrections to *sanskrit@cheerful.com*